श्रीमन्त्रराजपदस्तोत्रम्

{॥ श्रीमन्त्रराजपदस्तोत्रम् ॥}

पाञ्चरात्र आगमीय अहिर्बुध्न्य संहितात्

श्री मन्त्र राज पद स्तोत्रम्

श्री ईश्वर उवाच -

वृत्तोत्फुल्लविशालाक्षं विपक्षक्षयदीक्षितम् ।

निनादत्रस्तविश्वाण्डं विष्णुमुग्रं नमाम्यहम् ॥ १॥

सर्वैरवध्यतां प्राप्तं सबलौघं दितेः सुतम् ।

नखाग्रैः शकलीचक्रे यस्तं वीरं नमाम्यहम् ॥ २॥

पदावष्टब्धपातालं मूर्धाविष्टत्रिविष्टपम् ।

भुजप्रविष्टाष्टदिशं महाविष्णुं नमाम्यहम् ॥ ३॥

ज्योतींष्यर्केन्दुनक्षत्रज्वलनादीन्यनुक्रमात् ।

ज्वलन्ति तेजसा यस्य तं ज्वलन्तं नमाम्यहम् ॥ ४॥

सर्वेन्द्रियैरपि विना सर्वं सर्वत्र सर्वदा ।

यो जानाति नमाम्याद्यं तमहं सर्वतोमुखम् ॥ ५॥

नरवत् सिंहवच्चैव यस्य रूपं महात्मनः ।

Stotram Digitalized By Sanskritdocuments.org

महासटं महादंष्ट्रं तं नृसिंहं नमाम्यहम् ॥ ६॥

यन्नामस्मरणाद् भीताः भूतवेतालराक्षसाः ।

रोगाद्याश्च प्रणश्यन्ति भीषणं तं नमाम्यहम् ॥ ७॥

सर्वोऽपि यं समाश्रित्य सकलं भद्रमश्नुते ।

श्रिया च भद्रया जुष्टो यस्तं भद्रं नमाम्यहम् ॥ ८॥

साक्षात् स्वकाले सम्प्राप्तं मृत्युं शत्रुगणान्वितम् ।

भक्तानां नाशयेद् यस्तु मृत्युमृत्युं नमाम्यहम् ॥ ९॥

नमस्कारात्मकं यस्मै विधायाऽऽत्मनिवेदनम् ।

त्यक्तदुःखोऽकिलान् कामान् अश्नन्तं तं नमाम्यहम् ॥ १०॥

दासभूताः स्वतः सर्वे ह्यात्मानः परमात्मनः ।

अतोऽहमपि ते दासः इति मत्वा नमाम्यहम् ॥ ११॥

फलश्रुतिः

शङ्करेणादरात् प्रोक्तं पदानां तत्त्वनिर्णयम् ।

त्रिसन्ध्यं यः पठेत् तस्य श्रीर्विद्याऽऽयुश्च वर्धते ॥

Encoded by Vijayaraghavan Bashyam

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Mantrarajapada Stotram Lyrics in Devanagari PDF
% File name : padastotram.itx
% Location : doc_vishhnu
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Vijayaraghavan Bashyam
% Proofread by : Vijayaraghavan Bashyam
% Latest update : January 21, 2005
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website